दिनाङ्क :- 17.05.2025

प्रात: - 06:55

## राजनाथसिंह- भुजयात्रा

रक्षामन्त्री राजनाथसिहः कथितवान् यत् आतङ्कवादस्य विरूद्धं साम्प्रतं भारतस्य सङ्घर्षः केवलं सुरक्षायाः प्रसङ्गः नैववर्तते अपितु अयं राष्ट्रिय- रक्षा-नीतेः अङ्गोऽपि जातः । गुजरातराज्यस्य भुज- वायुसेना- स्थानके ह्यः वायुयोद्धृन् रक्षामन्त्री समबोधयत्। श्रीसिंहः सबलतया प्रोक्तवान् यत् वर्तमानस्य सङ्घर्ष-विरामस्याभिप्राय वर्तते यत् भारतेन पाकिस्तानं तस्य व्यवहारस्य आधारे परिवीक्षाधीनत्वेन संस्थापितम्। असौ अग्रे अवोचत् यत् यदि पकिस्तानस्य व्यवहारे संशोधनं आयास्यति तावत् काऽपि वार्ता नास्ति परञ्च यदि किमपि प्रतिकूलव्यवहारं करिष्यति तर्हि तस्मै कठोरदण्डं प्रदास्यते। रक्षामन्त्रिणा स्पष्टीकृतं यत् सम्प्रति सिन्दूराभियानं नैव सम्पन्नम्। तेनोक्तं यत् आतङ्कवादस्य समापनं नवीनभारतस्य सामान्या एव वार्ता विद्यते।

## राष्ट्रपतिः ज्ञानपीठ-पुरस्कारः

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः ह्यः संस्कृत-विदुषे जगद्गुरु-रामभद्राचार्याय त्रयोविंशत्यधिक-द्वि-सहस्र-तम-वर्षस्य कृते नवदिल्ल्याम् अष्टपञ्चाशत्तमं ज्ञानपीठपुरस्कारं प्रदत्तवती। जगद्गुरु-रामभद्राचार्यः प्रख्यातः उर्दूकविः गीतकारः गुलजारः च अस्य प्रतिष्ठितपुरस्काराय चितौ स्तः। साहित्यक्षेत्रे उत्कृष्टयोगदानाय प्रख्यात-जनाः अस्मिन् पुरस्कारेण सम्मानिताः सन्ति। अस्मिन् अवसरे प्रवदन्ती राष्ट्रपतिः जगद्गुरु-रामभद्राचार्या - गुलजार- इत्यनयोः कृते अभिनन्दनं कृतवती । अत्रावसरे जगद्गुरू- रामभद्राचार्य- वर्यः स्वप्रसन्नतां प्रकट्यन् उक्तवान् यत् तस्य साहित्यिकावदानाय मान्यता मिलितास्ति।

## राष्ट्रियान्वेषणाभिकरणम्

राष्ट्रियान्वेषणाभिकरणेन गतवर्षे गुरदासपुरजनपदे एकस्मिन आरक्षि- स्थानके ग्रेनेड- इत्यनेन प्रहारेण सम्बद्धे एकस्मिन् प्रकरणे ह्यः पञ्चाबराज्ये प्रतिबन्धितेन बब्बर- खालसान्ताराष्ट्रियातङ्की- समूहेन सम्बद्धेषु पञ्चदश- स्थानकेषु अन्वेषणं कृतम्। अभिकरणेनानेन प्रोदीरितं यत् अन्वेषणाभियानवधौ जङ्गमदूरवाणीम् आङ्ककीय- यन्त्राणि प्रपत्राणि समेत्य अनेकाः आपत्तिसामग्र्यः गृहीताः। अत्रोक्तं वर्तते यत् पाकिस्तान- स्थितस्य आतङ्कवादिनः हरविन्दरसिंहस्य एकः प्रमुखः सहयोगी साम्प्रतिके समये पञ्जाबहरियाणा- राज्ययोः विभिन्नेषु आरक्षिस्थानकेषु ग्रेनेड- इत्यनेन विस्फोटकपदार्थेन प्रहारं कर्तुम् उत्तरदायी जातः।

## विदेशीमुद्राभण्डारः

भारतस्य विदेशी-मुद्रा - भण्डारः मेमासे सप्ताहान्ते नवत्यधिक- षड्शतं दशमलव षट् बिलियन डॉलर- परिमितं यावत् संवर्धितम्। भारतीयरिजर्व बैंकद्वारा प्रख्यापितस्य साप्ताहिक- सांख्यिकी- अनुपूरकरस्य अनुसारं गतसप्ताहावधौ विदेश- मुद्रा - परिसम्पत्तयः ये भण्डारस्य प्रमुखाः घटकाः विद्यन्ते ते च षण्णवत्यधिकैक- मिलियन- डॉलर- परिमितात् संवर्ध्य एकाशीत्यधिक- पञ्चशतं दशमलव त्रीणि बिलियन- डॉलर परिमितं यावत् अधिकम् अभवत्।

## आई.पी.एल.

इण्डियन प्रीमीयरलीग इत्येषा विंशतिप्रति विंशति- क्रिकेट- स्पर्धा- मालिका सप्ताहान्तरम् अद्य पुनः समारभते। तावत् अद्य रॉयल- चैलेन्ज्स- बेंग्लुरू- कोलकाता- नाइट-राइडर्स- इत्यनयोः दलयोः मध्ये द्वन्द्वं भविष्यति। क्रीडैषा सायंकाले सायंकाले सार्धसप्तवादने क्रीडिष्यते। आई.पी.एल्. इति प्रतिस्पर्धा भारत- पाकिस्तान- देशयोर्मध्ये जातं मध्ये जातं सङ्घर्षम् अवलोक्य ममासे नवमे दिनाङ्के स्थगिता जातासीत्।